क्ला महारुद्राक्ष महाफलेति । तथा ब्रह्माण्डे । पौषमासि यदा देवि अष्टम्यां यमदैवतं । नक्ष
त्रं जायते पुण्यं यल्लोके रौद्रमुच्यते । यदानुसाम हापुण्या जयंती अष्टमी स्मृतेति । अ
थ माघगसिता भीष्माचनेय्योदिता । तथा च ब्रह्मपुराणे । माघमासि सिताष्टम्यां स
लिलैर्भीष्मतर्पणं । श्राद्धं च येन राः कुर्युस्ते स्युः संततिभागिनः इति । तत्र मंत्रः । वैयाघ्र
पद्य गोत्राय संकृत्यप्रवराय च । अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे इति । अन्याः शुक्लाधि
बुधान्वितेति । तथा च महाभारते । शशिपुत्रसमायुक्ता परिपूर्णा सिताष्टमी । तस्यां नियम
कर्त्तारो स्युः खण्डितसंपदः । शशिपुत्रो बुधः । अथ पुण्या नवमी । अथ नवमी त्रास्ता खिलेति
अखिला सर्वमासस्था सर्वा । नवम्यां च सदा पूज्या गौरीदेवी समाधिना । वरदा सर्व
लोकस्य भविष्यति नरो संयति इ सामान्येन वामनपुराणोक्ते । इषेमध्यो ऊर्जे वाथ्य नरा
स्मितेति । तथा च ब्राह्मे । चैत्रे नवम्यां शुक्लायां भद्रकाली महाबला । योगिनीनां तु सर्वासा
माधिपत्ये अभिषेवितेति । तथा देवीपुराणे । आश्विने नवमी शुक्ला तस्यां कोटिगुणं फलमि
ति । तथा शुक्लपक्षे नवम्यां यः कार्त्ति

॥६२॥

कस्य समाहितः। स्नायाद्दद्यान्नमस्कुर्याद्दक्षयं लभते फलमिति। अथ सुभादशमी। अथ द
शमी ज्येष्ठे सिता पुण्यदेति। तथा देवीपुराणे। ज्येष्ठस्य शुक्लदशमी संवत्सरमुखी स्मृता।
तस्यां स्नानं प्रकुर्वीत दानं चैव विशेषत इति॥ हस्ते भौमदिने स्मृता दशहरा सैवाग्रिया।
हस्ते दशहरा स्मृता। सैव हस्तफलैव भौमदिने अग्रियेति योजना। तथा ब्रह्मपुराणे। ज्येष्ठ
मासि सिते पक्षे दशमी हस्तसंयुता। हरते दश पापानि तस्माद्दशहरा स्मृतेति। दश पापा
न्याह मनुः। पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः। असंबद्धप्रलापश्च वाङ्मयं स्याच्चतु
र्विधं। अदत्तानामुपादानं हिंसा चैवाविधानतः। परदारोपसेवा च कायिकं त्रिविधं स्मृतं। पर
द्रव्येष्वभिध्यानं मनसानिष्टचिंतनं। वितथाभिनिवेशश्च त्रिविधं कर्म मानसमिति। विष्णु
धर्मोत्तरे। दशम्यां शुक्लपक्षे तु ज्येष्ठे मासि कुजे दिने। गंगावतीर्णा हस्तर्क्षे सर्वपापहरा
स्मृतेति। अस्मिन्योगे गंगास्नानमात्रेण सर्वपापहरा स्यादित्यर्थः। अथ पुण्यैकादशी
अथोत्तमा। एकादश्यखिलेति। तथा नृवाराहपुराणे। एकादश्यां तु नक्तेन नरः कुर्याद्यथा
विधि। मार्गशीर्षे शुक्लपक्ष आरभ्याब्दं विचक्षणः। तद्व्रतं धनदं श्रेष्ठं कृतं वित्तं प्रयच्छ
तीति। सिता त्वतिफलादित्यर्क्षपुष्यान्वितेति। आदित्यर्क्षं पुनर्वसुः। तथा विष्णुधर्मे।
एकादश्यां शुक्लपक्षे यदृक्षं वै पुनर्वसुः। नाम्ना सा विजया ख्याता तिथीनामुत्तमा
तिथिरिति। तथा। एकादश्यां सिते पक्षे पुष्यर्क्षं मत्र सत्तम। तिथौ भवति सा प्रोक्ता
विष्णुना पापनाशिनीति। अथ पुण्या द्वादशी। द्वादश्यपखिला शुभासितगता ह्युग्रा
र्क्षेति ज्ञान्विता सोक्तेष्टेति। तथा विष्णुधर्मोत्तरे। द्वादशी शुच यदृक्षं शुक्ला सुच

॥६२॥

8

124

विशेषतः। श्रवणेन तु युक्तास्तु तत्रापि द्विजसत्तम। विशेषाद्बुधयुक्तासु शुक्लपक्षगतासु चे-
ति। अथ भगार्कवायुसुरपक्रव्यादभै रन्विता क्रमशो वाजपदेन पूषदहनेन्द्वादित्यपुष्यै-
र्युता। स्या चैत्रादिगता क्रमाच्छुभतरेति। भगः पूर्वा। अर्कः हस्तः। वायुः स्वाती। सुरपो ज्ये-
ष्ठा। क्रव्यादभं मूलः। श्रुतिः। श्रवणः॥ ॥ आजपदं पूर्वाभाद्रपदा। पूषा रेवती। दहनः
कृत्तिका। इन्दुः मृगः। आदित्यः पुनर्वसुः। पुष्यः प्रसिद्धः। चैत्रादिद्वादशमासगता द्वादशी
एभिर्नक्षत्रैः क्रमाद्युक्ता शुभतरा। तथा च विष्णुधर्मोत्तरे। भाग्यर्क्षसंयुता चैत्रे द्वादशी
स्यान्महाफला। हस्तायुक्ता तु वैशाखे ज्येष्ठे तु स्वातिसंयुता॥ ज्येष्ठया तु तथाषाढे मूलो-
पेता तु वैष्णवे। वैष्णवे श्रावणमासे। तथा भाद्रपदे मासे श्रावणेन च संयुता। आश्विने द्वादशी पु-
ण्या भवत्याजपादसंयुता। कार्त्तिके रेवतीयुक्ता सौम्ये कृत्तिकया तथा। सौम्ये मार्गशीर्षे। पौषे मृ-
गशिरोयुक्ता माघे चादित्यसंयुता। फल्गुने पुष्यसहिता द्वादशी पावनी परा। नक्षत्रयुक्तास्वेतासु स्ना-
नदानमुपोषणमिति। माघे तु कृष्णा क्रान्तौ मूले वा यदि शोस्यते अत्र च बिल्वस्नानादीति। आदिश-
ब्दात्तिलोद्वर्तनादि। तथा च विष्णुधर्मे। माघ्यां तु समतीतायां श्रवणेन तु संयुता। द्वादशी या
भवेत्कृष्णा प्रोक्ता सा तिलवैष्णवी। वैष्णवी द्वादशी। तथा। मूलर्क्षगे त्रिशिधरे माघमासि प्रजा-
यते। एकादश्यां कृष्णपक्षे सोपवासो जितेन्द्रियः। द्वादश्यां बहुलाहारं कृत्वा पापैः प्रमुच्यत
इति। अथारो गुरुः सिंहे मेषगतो रविः करयुता चेत्स्यात्सिता द्वादशी योगेऽस्मिन् व्यतिपात-
के विलनुयाद्दानादीनि। आरो मंगलः। तथा ज्योतिःशास्त्रे। पंचाननस्थौ गुरुभूमिपुत्रौ मेषे

रविः स्याद्यदि शुक्लपक्षे पात्राभिध्यानात् करणेन युक्ता तिथिर्व्यतीपात इतीह योगः

अस्मीस्तु गोभूमिहिरण्यवस्त्रदानेन सर्वं परिहाय पापं सुरत्वमिन्द्रत्वमनामयत्वं म-

र्त्याधिपत्यं लभते मनुष्य इति। पात्राभिध्यानातिथि द्वादशी। अथ पुण्या त्रयोदशी।

अथाद्यातिथिः पंचेषोमधुशुक्लगेति। पंचेषोः कामस्यातिथिः त्रयोदशी। तथा च यो-

मे चैत्रशुक्लत्रयोदश्यां मदनं चंपकात्मकं कृत्वा संपूजयेल्लेनवीजयेद्व्यजनेन तु। अथ पुण्या

चतुर्दशी। अथ शुभदा भूतेति भूता चतुर्दशी। तथा च विष्णुः सर्वाश्चतुर्दशीनंदीजले

स्नातो धर्मराजपूजभिद्वा पापेभ्यः पूतो भवतीति। असितादृतमेति। तथा च पाद्मे। यां का-

॥६३॥

त्तिकस्य रितं प्राप्य कृष्णपक्षे चतुर्दशी। यापुनयतितस्यां तु नियतस्तर्पयेद्यममिति। मा-

घस्याकृजयुगिति। तथा देवीपुराणे। तथा कृष्णचतुर्दश्यां भौमाहे पितृतर्पणमिति। म-

ध्यावतिफलेति। भौमयुक्ता कृष्णचतुर्दशी केवलावा कृष्णचतुर्दशी चैत्रे अतिफलदेत्य-

र्थः। तथा पुराणे। चैत्रे कृष्णचतुर्दश्यां यस्मात्रिवसंनिधौ गंगायां च विशेषेणनस-

प्रेतो भिजायते। चैत्रे कृष्णचतुर्दश्यामंगारकदिनं यदि धित्राचलं पुनर्नस्या गंगायांस्नान

भोजनादिति। ऊर्जे भूतमालाष्टयुगिति। लाष्टं चित्रा। तथा ब्राह्मे। कार्त्तिके भौमवारेण

चित्राकृष्णचतुर्दशी। तस्यामाराधितः स्थाणुर्यच्छेछिवपुरं ध्रुवमिति। चैत्रेपारव्य

तभोनभस्य गसितात्वद्यातथाषाढगेति। तथा च स्कांदे। चैत्रे चतुर्दशी शुक्ला श्राव-

॥६३॥

णो ष्टपादयोः। माघस्य कृष्णपक्षे या दाने बहुफलप्रदेति। माघस्य कृष्णपक्ष इत्यनेन शिव
गात्रे सूच्यते सा च पूर्वोक्तेति नात्रोक्तेति भावः। तथा च मात्स्ये आराधिते महेन्द्रे तु धराजाकारा
सुय ष्णिषु। ततः शुक्लचतुर्दश्यामनं न पूजयेत्सदेति। इंधं आराधनं वा सर्वोद्धोधः सवाश्वि
ने विहितन्द्रति। तथा आह। आषाढमासभूते छिन्नं शिवं संपूज्य मानवः। सर्वपापविनिर्मुक्तः
सर्वसंपदमाप्नुयादिति। अथ पुण्या पौर्णमासी। चैत्रास्वोर्जतपस्सु पुण्यदास्या पौर्णमासीति
तथा विष्णुधर्मोत्तरे। चैत्रा स्वा कार्त्तिकी माघी पूर्णिमा तु महाफलेति। तथा मासर्क्षे सकला
यातिः। चैत्रादिसा मार्गान्ता सर्वा पूर्णिमा महाफलेत्यर्थः। तथा च विष्णुधर्मोत्तरे। पौर्णमासी
षु सर्वासु मासर्क्षे संहितासु च। दत्तानामिह दानानां फलं दशगुणं भवेदिति। जिवनाशि
नो स्वेकक्षगलेपीति। जीवो बृहस्पतिः॥ अधिनाफलं च समुच्चीयते। तथा च स्कान्दे पुराणे
यस्यां पूर्णेन्दुना योगं याति जीवो महाबलः। पौर्णमासी तु सा ज्ञेया महापूर्वा द्विजोत्तमेति।
अथो वारो देवगुरोर्यदेन्दुधिषणौ मासर्क्षगौ चेद्भवेत्तस्मात्संवदत्रो महत्त्वं क्षितिते ति। य
दादेवगुरोर्वारः इन्दुधिषणौ चन्द्रबृहस्पती मासर्क्षगौ मासनक्षत्रगौ तस्मात् मासनक्ष
त्रात् सचन्द्रनक्षत्रे रविः एवंभूते योगे पूर्णिमा चेत्स्यात्सा महती उक्ता। तथा च ज्योतिःशा
स्त्रे। मासास्यर्क्षे चेदिन्दुगुरू तस्मात्संचद्रो रविः। पूर्णिमा जीववारे तु महानाख्या तु सा तिथि
रिति। अथैन्द्रे गुरुश्चन्द्रमा ज्येष्ठे कोविधि ज्ञेयेति। अथ ज्येष्ठमासि ऐन्द्रे ज्येष्ठायां गु

॥६४॥

कृष्णं इमा सा श्च तिथिश्चे रोहिण्यां अर्कः। दोते या पूर्णिमा सापि महती सर्थः तथा च तंत्रे
वर्हे इंद्रे गुरुक्तौ चंद्राचैव प्राजापत्ये रविस्तथा। पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठाति कीर्तिते
ति। अग्नियमभ ज्ञोह्रेषु चेत्कार्त्तिकी शास्त्रेति। तथा च पाद्मे। आग्नेयं च यदा ऋक्षं कार्त्ति
क्यां च भवेत् क्वचित्। महती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा। यदा याम्यं भवेदृक्ष
तस्यां भवति च क्वचित्। तिथिः सापि महापुण्या ऋषिभिः परिकीर्तिता। प्राजापत्यं यदा
ऋक्षं तथा तस्यां नराधिप। सा महाकार्त्तिके प्रोक्ता देवानामपि दुर्लभेति। सारविमंद=
जीवदिवसे तीवोत्तमेति। स्नानक्षत्रफला कार्त्तिकी। तथा च पाद्मे। मंदवारे केंगुरौ वापि
वारेष्वेतेषु च त्रिषु। जीयते तानि चक्र क्षाणि स्वयं प्रोक्तानि ब्रह्मणा॥ अथाश्वमेधिकं स्ना
न स्यात् भवेन्नृपेति। मेषग स्वाकि श्वे तपनः कृतौ गुरु विधुसिंह च माघकल्पमेति आ
किः शनिः। तथा च ज्योतिःशास्त्रे। मेषपृष्ठे यदा सौरिः सिंहे च गुरुचंद्रमाः॥ भास्करः श्रव
णिरवौ नु महामाघी तु सा स्मृतेति अथ पुण्या अमावास्या। पूर्णिमा कुज सोम जीव सहिते
तिः अमा अमावास्या। तथा च महाभारते। अमा सोमे तथा मे भौ गुरुवारे यदा भवेत्
तत्सर्वं पुष्करं वा मत्सूर्यपर्व शताधिकमिति। मैत्राथ रौद्रा निलादित्य जैकपद दक्षवारुण
धनिष्ठा पुष्य राधा रवा भैः फलाग्ये ति अनुराधा पूर्वाषाढा आर्द्रा स्वाती पुनर्वसु पू
र्वभाद्रपदा शततार धनिष्ठा पुष्य विशाखा रव्यैर्नक्षत्रै रन्विता श्रेष्ठा। तथा च विष्णुपु
राणे। अमावास्या यदा मैत्र विशाखा स्वाति योगिनी। श्राद्धे पितृगण स्तृप्तिं न दाप्नोत्य

॥६४॥

६

वार्षिकी। अमावास्ये यदा पुष्ये रौद्रर्क्षे वा पुनर्वसौ। द्वादशाब्दी न दातृप्तिं प्रायांति पितरोक्षिता
नास्य चाजैकपादर्क्षे पितृणां तृप्तिमिच्छता। वारुणे चाप्यदैवत्ये देवानामपि दुर्लभेति। वरुण
र्क्षे कृष्णभ्रतरा माघे इति। वरुणर्क्षं शतनक्षत्रका। तथा चोक्तं। माघ्या सिते पंचदशी कदाचि
दुपैति योगं यदि वारुणेन। ऋक्षेण कालः सपरः पितॄणां नाल्पपुण्यैर्नृप लभ्यते सा इ=
ति। अथ कार्यं यथा स्नानं दानमिष्टदेवतापूजनं मुख्यं विद्यान्निबंधेषु तदिति। अथ रह आसु पुण्य
तिथिषु स्नानं दानं इष्टपूजनं मुख्यं देवपूजनादि च यथामेन प्रकारेण कार्यं तन्निबंधेषु का
लनिर्णयादिषु विद्यात् विजानीयात्। मुख्यत्वाद्व्रतादि ग्राह्यं। संग्रहाधिकारित्वान्नोक्तमि
तिभावः। श्रीदः श्रीभिरिजागणेशभुजगस्कंदार्कदुर्गाक्रिमादिं वा वासुकिमुख्यजन्स्मरश्चिर्बा=
भोजासनाश्वेश्वरा ए ते स्युः प्रतिपन्मुखा तिथिष्विति। श्रीदो धनदः अंबामातरः अजो वि=
ष्णुः। अंभोजासनो ब्रह्मा। तथा च पितामहः। प्रतिपद्धनदस्योक्ता द्वितीया तु श्रियः स्मृता। तृ
तीया तु भवान्याश्च चतुर्थी तत्सुतस्य च। नागानां पंचमी प्रोक्ता षष्ठी प्रोक्ता गुहस्य च। सप्तमी
भास्करस्योक्ता दुर्गायाश्चाष्टमी स्मृता। मातृणां नवमी प्रोक्ता दशमी वासुकेः स्मृता। एका
दशी ऋषीणां तु द्वादशी चक्रधारिणः। त्रयोदशी त्वनंगस्य शिवस्योक्ता चतुर्दशी।
तथा ध्यातु स्वतिथीनामुत्तमा स्मृतेति। अमावास्यायाः सर्वसाधारणमाह। स्याद्देवपित्र्यर्चने
मावास्या सकलेरिति। सकलदेवपित्र्यर्चने मावास्यास्यादित्यर्थः। अमावास्या सर्वदेव

नक्षत्रयुक्ततिथिनिर्णयः॥

पित्र्यकर्मण्यदाहृदेति॥ ॥ इति श्रीकालः प्रतिसंस्कृति पुण्यातिथिनिर्णयः॥ अथ नक्ष
त्रयुक्ततिथिनिर्णयः। अथ याश्शुभतिथिः पिन्नया कीर्तिता पूर्वेद्युर्यदि मादिप्रकृ

शुभतरा सर्वेत्तरे चे क्रियापर्याप्तो यदि सोन्वयः शुभकर इति। अथ या तिथिः भाय-
न्वया नक्षत्र वारादि योगा शुभतरा कीर्तिता साय दि दिवसस्य पूर्वार्द्धे पूर्वभागे आदि
फकृतदा सर्वा शुभतरा भवति। चेदथवा उत्तरार्द्धे दिवसस्य उत्तरभागे आदिफकृतदा-
यदि सोन्वयः नक्षत्रादि योगः क्रिया पर्याप्तः कर्मकाल व्यापी तदा शुभतरो नान्यथेत्यर्थः।
तथा च ब्रह्मकैवर्त्ते पूर्वभागे तिथिर्यस्यां ऋक्षयोगान्विता भवेत्। सा तिथिः सकला
ज्ञेया नांते ऋक्षेण संयुता। या वत्सा तिष्ठति ब्र हान्स्नावकालः प्रशस्यते दानं पूजा। तदा
पूजादिक सर्वं तस्यां तत्फलदं भवेत् इति। अथान्या श्रुति कृदिन्त्री रोहिण्यष्टमिकां पु
नाति सकला मित्युक्तमादौ इति। आदौ जन्माष्टमी श्रवणद्वादशी निर्णये। अथ युगादयः

॥६५॥

अथो जैनितमीच राधगसितोग्निः सौम्यो ब्राह्मयकृत् माघमासितपर्ववाथ मदनो-
भाद्रे सिते सोमया स्वयोमीनयुगादय इति। अग्निः तृतीया मदनस्त्रयोदशी। तथा च
भविष्यत्पुराणे। नवम्यां शुक्लपक्षस्य कार्त्तिके निरगकृतं। त्रेतासित तृतीयायां वैशाखे
समपद्यत। दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगं। कलिः कृष्णत्रयोदश्यां नभस्ये मासिनि-
र्गतः। युगादयः स्मृता ह्येते दत्तस्याक्षयकारका इति। ब्रह्मपुराणे। माघे तु पूर्णमास्यां तु-
घोरं कलियुगं तथेति माघमासपौर्णिमायां युगादित्वे मजि प्रत्योक्तं सितपर्यवेति। तथा
तृतीया रोहिणीयुक्ता वैशाखस्य सितानुया। मघाभिः सहिता कृष्णा नभस्ये तु त्रयोदशी।
युगादयः स्मृता ह्येते दत्तस्याक्षयकारका इति देवलवचनमपि प्रत्योक्तं सौम्यो-

॥६५॥

(130)

२८

ग्राह्यं युगादि । तिन तथा सौम्यास्वग्र इति । वा यदा चांद्र सौर मासैक्यं तदा न विशेषः कश्चित् । य
दा तु चांद्र सौरमासा भिन्नास्तदा यो विशेषस्तमाह अथ भवश्चेत् सौर चांद्रौ पृथक् । ग्राह्या-
स्तत्र युगाद्यो दशहराख्याश्चार्कमास स्थिता नोत्कर्ष इति अथ चेत् यदा सौर चांद्रौ
पृथक् भिन्नौ भवतस्तत्र तदा अर्कमास स्थिता युगाद्यो ग्राह्याः । तथा च दशहराख्याः अ
नेन व उत्कर्षिना स्तीत्यर्थः । तथा च ऋष्यशृंगः । दशहरास्तु नोत्कर्षश्चतुर्ष्वपि युगादिषु
उपाकर्म महाषष्ठ्यो हीनेति दिष्टं वृषादिन इति । तथा च कालनिर्णयकारैरपि अन्यमतानि
निरस्योक्तं । वयं तु ब्रूमः । यद्यपि वैशाखादि शब्दः चांद्रमास वचना एवेति निरूपितं प्रागु
दाहृत युगाद्यक्षे बोधक वाक्य पर्यालोचन या सकल जनप्रसिध्यानुगुण्याद्दर्
शनाद्दशाश्चसौरमासगत एव युगादिर्ग्राह्य इति । अथ युगांतान् हरिवंश्यैकोक्तकल
नोक्तस्य यस्क्रमः । ज्ञेयास्ते क्रमशो युगांत समयाः इति । हरिः सिंहः उश्चा वृषभः ।
तथा च ब्रह्मांड पुराणे । सूर्यस्य सिंह संक्रांत्या मंत कृतयुगस्य तु । अथ वृश्चिक संक्रां
त्यामंतस्त्रेतायुगस्य तु । ज्ञेयस्तु वृषसंक्रांत्यां द्वापरांतस्तु संख्य[illegible]या । तथा च कुंभ
संक्रांत्याः मंतः कलियुगस्य तु इति । यदा युगांतो रवेः संक्रांतौ दिनभं च योक्तमिति यद्
रवेः संक्रांतौ दिन नक्षत्र रेवती सापि युगांत इत्यर्थः । तथा चादित्य पुराणे । दिनर्क्षं रेवती
यत्र गमनंचैव राशिषु । युगांत दिवसं विद्धि तत्र दान मनंतकं इति । अयनं तु दक्षं तु
ला मेषकौ । सप्तम्यां ग्रहणे पि वा यदि भवेत्सोन्यो युगांत इति । उदगयनं । मकरसंक्रां

तिः। तथा च तत्रैव। ग्रहोपरागे विषुवे सौम्ये वाभिहिरोपदि। सप्तमी शुक्लकृष्णायां यायुग
गांत दिवसं विदुरिति। स्मृतं दानाद्यत्र सहस्रगुणितं तद्युगादिषु पातिअत्र युगां
तेषु तद्वत् तथा युगादिष्वपि दानादि सहस्रगुणितं भवेदिति स्मृतं। तथा च मनुः। सहस्र
गुणितं दानं भवेद्दत्तं युगादिषु। कर्मश्राद्धादिकं चैव तथा मन्वंतरादिष्विति। अथ नाना
युगधर्माः। ध्यानज्ञानतलयास्य यज्ञं कृतयुगे ज्ञानं तु लिंगार्चनं त्रेतायां यजनं मखैर्वा भ
जनाध्यानादि तु द्वापरे। तिष्ये दानं दयादमेश्वरकथासंकीर्तनादि स्मृतमिति। अये
तं आचरेत्। तिष्यः कलिः। यजनं परं त्रेतायामन्वेति। तथा च शिवपुराणे। ध्यानं परं कृ
तयुगे त्रेतायां लिंगपूजनं। द्वापरे ध्ययनं तिष्ये महादेवस्य कीर्तनं। तथा विष्णुधर्मोत्त
रे। ज्ञानं परं कृतयुगे त्रेतायां च तपः परं। द्वापरे च तथा यज्ञः प्रतिष्ठा च कलौ युगे। तथा बृ
हस्पतिः। तपो धर्मः कृतयुगे ज्ञानं त्रेतायुगे स्थितं। द्वापरे चाध्वरः प्रोक्तस्तिष्ये दा
नं दयादम इत्यादि। ब्रह्मा कजित्रिनाश्चतुर्युगस्तु राज्ञेयाः क्रमात्पूजने इति। अजः श्री
कृः। तथा च स्कांदे। ब्रह्मा कृतयुगे देवः त्रेतायां भगवान् रविः। द्वापरे भगवान् विष्णुः क
लौ देवो महेश्वर इति। अन्ये ब्रह्मा पितामहाभिधविरिंच्यब्जासनात्मभूरज इति।
अत्र जो ब्रह्मादिशिश्च तु मूर्तिशिश्च तु युगेषु अभ्यर्च्य इत्यर्थः। तथा चोक्तमपराजि=
पृच्छायां कृतादिषु गदित इत्युपक्रम्य ब्रह्म पितामहश्चैव विरंचिकलासनः जनस्त इ
तसंप्रोक्ता मूर्तयः परमेष्ठिन इति। अथो विष्णुः सितरक्तनीलः सुतन्तुः कृष्णः क्रः क्रमा

॥६९॥

नं

॥६९॥

नामभिः। हंसद्येरिति। अर्च्यइति पूर्वेण संबन्धः। सुतनुरित्यनेनाकारविशेषो विज्ञापितः
तथा च श्रीभागवते। कृतं त्रेता द्वापरं च कलिरित्येषु केशवः। नानावर्णाभिधाकारो नानैव विधि
नेज्यत इत्यादिनोक्तेः। अथ वासुदेवकमुखाः पूज्याश्चतुर्मूर्तयो देवस्यादियुगक्रमादि
ति। आदियुगं कृतयुगं तथा चापराजितस्थल्यां। सोमं वामेन हस्तेन दक्षिणेन रविं वहन्। वह्निं
हृदयमध्ये यो वासुदेवः प्रकीर्तितः। आदियुगे द्विजैः पूज्यः श्वेतवर्णः कृते युगे। संकर्षणो वहस्ये
व लाङ्गलं मुसलं तथा। रक्तवर्णः प्रपूज्येत त्रेतायां तत्रजातिभिः। प्रद्युम्नो द्वापरे पूज्यो वै-
श्यैः शारधनुर्धरः। पीतवर्णः पीतवासाः शिल्पज्ञानप्रयकः। कलौ युगेऽनिरुद्धाख्यः पूज्यते-
शूद्रजातिभिः। कृष्णवर्णो विकृत्यैव खड्गचर्मकरद्वये। स्नातो योऽनिरुद्धं विष्णुं पापवृन्दं विना
शयेदिति। अथ कृते धर्मो मनूक्तः स्मृतः। प्रोक्तो गौतम[illegible]खलिखितः। पाराशरोऽन्ये[illegible]इति अ
न्येषु त्रेता द्वापर कलिषु। तथा च पाराशरः। कृते तु मानवो धर्मः त्रेतायां गौतमः स्मृतः। द्वापरे शंखलि
खितः कलौ पाराशरः स्मृत इति। अथो कर्तव्यं प्रतिमा हेम पट्टजनितं कार्पासजं च क्रमात्। देवा वा
सुपवित्रकं कृतयुगादाविति। पट्टशब्देन पट्टसूत्रं तथा च कालोत्तरे पवित्रारोपणे। कृते प्रतिमा
यं कार्यं त्रेतायां हेमसंभवं। पट्टजं द्वापरे शस्तं कार्पासं तु कलौ युगे इति। संश्रयेत् पुष्करं क्षेत्रं
नैमिषकाननं कुरुगतं क्षेत्रं च गंगां तथेति। कुरुदेशास्तत्रं कुरुक्षेत्रं कुरुक्षेत्रं। तथा कृतादौ
एतानि क्षेत्राण्याश्रयेदित्यर्थः। तथा च विष्णुधर्मोत्तरे। पुष्करं तु कृते सेव्यं त्रेतायां नैमिषं त
था। द्वापरे तु कुरुक्षेत्रं कलौ गंगां समाश्रयेत्। अथ युगभेदेन ज्याभिदेशग्रामकुलानि यान

स्प२

कि जनं चोक्तं क्रमादिति । पराशरः । यजेद्देवं कृतयुगे त्रेतायां मखमुख्यजेन्द्र द्वापरे कुलमेकं कलौ हरिं
तु कलौ युग इति । पापिष्ठा अपि ब्राह्मणा न भोजनेष्वधुरिते हानिः कृता दोषाने दिति । दुरिते हानिः पापैत्य
मिः । क्रमादिति मध्यप्रदीपिकाल्या येनात्रापि यो ज्यं । तथा च तत्रैव । कृते संभाष्य न पतितत्वेन । यां
स्पर्शनेन तु । द्वापरे चान्नमादाय कलौ कर्त्तैव लिप्यत इति । अथ कलिधर्माः । तिष्ये श्रेष्ठतरं स्मृ
तं हरिहराभ्यर्चाभिधा कीर्त्तनमिति । तथा च महाभारते । यस्त्वोनमः शिवायेति मंत्रेणानेन
शंकरं । सकृत्कलौ समभ्यर्च्य सर्वपापैः प्रमुच्यते । सदा तं यजते यस्तु श्रद्धया मुनिपुंगव ।
लिंगे वा स्थंडिले वापि कौतुकी विधिपूर्वकं । कृतदोषं विनिर्जित्य रुद्रलोके प्रमोदते । इति । त
था च अग्निपुराणे । कलौ कलिमलध्वंसं सर्वपापहरं हरिं । ये र्चयंति नरा नित्यं तेपि वंद्याः य

॥६७॥ था हरिरिति । तथा व्यासः । ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेर्चयन् । यदाप्नोति त ॥६७॥

दाप्नोति तदाप्नोति कलौ संकीर्त्य केशवमिति । स्वर्गार्थी विष्णुधालयं कारितपुरग्रामादन्न
पः कारयेद् इति । तथा विष्णुधर्मोत्तरे । देवतावेश्मपूजानि न रानि कलौ युगे । कर्त्तव्यानि म
हीपालैः स्वर्गलोकमभीप्सुभिरिति । अथ कलिवर्ज्यानि । वर्ज्यं गोनरनानि मेधकरणं म
द्यं विवाहः पुनर्वूढायाश्च कलौ कमंडलुधृति ब्रह्मव्रतं नैष्ठिकं । ज्येष्ठांशोद्धरणं वनाति
थिस्तुराय थं पशोर्हिंसनं भ्रातस्त्रीषु नियोगतः सुतजनिस्ता द्रुदनस्थाश्रमः । स्वेयान्य
थि कपापिशुद्धिरयसं कोच्चो गुणापेक्षया । यद्वेष्ठ अतताश्व विप्रहननं विप्रस्य शाति
र्त्तकं । विप्राणां मध्यनिष्कृतिमरणाकृ संसर्गदोषो महाप्रस्थानो पगमस्त्व्य हान त्रानि

135

नामन्याहृतिहीनता। उद्वाहो जननसपिंडदुहितुर्द्वितीर सान्यात्मस्त्रीकारोप्य सवर्णजाँरिणाय
सोमस्य संविक्रयः। विस्त्रंभत्राकुनोपयाचितकयोः सामुद्रिकोपः श्रुतिः स्वभादेश्च सुराग्रह
स्यनुकृतिर्यज्ञेच सौत्रामणौ। इत्यादीनि कलौ त्यजेदिति। स्तेय[illegible]त्या-न्याधिकपापिश्रुद्धिः
सुवर्णस्तेयव्यतिरिक्तमहापातकि प्रायश्चित्ते। अथ संकोचो गुणापेक्षया। श्रोत्रियवोदिगु
जेन प्रायश्चित्तन्यूनता उद्यत शस्त्र आततायी। शामित्रं नाम कर्म। मरणाय कृ मरणान्ता।
जननीसपिंडो मातृसपिंडः। आदिशब्दोसमुद्रयातुर्ब्रह्महत्यास्य पुनसंग्रहादीनि वर्ज्यानि।
तथादित्यपुराणे। दीर्घकालं ब्रह्मचर्यं धारणं च कमंडलोः। गोत्रान्मातुः सपिंडाच्च विवाहो गो
वधस्तथा। नराश्वमेधौ मद्यं च कलौ वर्ज्यं द्विजातिभिः। तथा च ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोव
धं तथा। स्मृत्यंतरे। विधवायां सुतोत्पत्तौ देवरस्य नियोजनं। बालायाः क्षतयोन्याश्च वरेणा
न्येन संस्कृतिः। कन्यानामसवर्णानां विवाहश्च द्विजन्मभिः। आततायि द्विजाग्र्याणां धर्मयुद्धेन
हिंसनं। द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः। वानप्रस्थाश्रमस्यापि प्रवेशो विधिनो
दितः। वृत्तस्वाध्यायसापेक्षमघसंकोचनं तथा। प्रायश्चित्तविधानं च विप्राणां मरणांतिकं। संस
र्गदोषस्तेथान्यमहापातकिनिष्कृतिः। वरातिथिपितृभ्यश्च पशूपाकरणक्रिया। दत्तौरसेतरे
षां च पुत्रत्वेन परिग्रहः। सवर्णान्यांगनादुष्टैः संसर्गः शोधितैरपि। अयोनौ संग्रहे वृत्ते परित्यागो गुरु
स्त्रियः। परोद्देशात्मसंन्यासः उच्छिष्टस्यापवर्जनं। प्रतिमाभ्यर्चनार्थाय संकल्पश्च सधर्मकः।
अस्थिसंचयनादूर्ध्वं अंगस्पर्शनमेव च। शामित्रं चैव विप्राणां सोमविक्रयणं तथा॥ षड्भक्तान
सत्रदीक्षा च सर्वेषां कमंडलुविधारणं। महाप्रस्थानगमनं गोसंज्ञप्तिश्च गोसवे। सौत्रामण्यामपि सुराग्रहस्य च संग्र

135

गानेनान्नकरणं हीनकर्मणः । एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः । निवर्तितानि विद्वद्भिर्व्यव-
स्थापूर्वकं बुधैः । समयश्चापि साधूनां प्रमाणं वेदवद्भवेदिति । आदित्यपुराणे । त्रापथः त्राकुन-
स्य पूः स्वामुद्रिकसुपश्रुतिः । उपपातकिनमादेशाः संभवंति कलौ क्वचित् । तस्मात्तन्मात्रलोभे-
न कलौ कार्यं न कारयेत् ॥ ॥ अथ मन्वादयः । अथ सितोभिश्चैत्रभाद्रस्थितेः शुक्लाश्वयुक्तप-
स्यथासितवसुभाद्रेथवाश्रावणे शुक्लेपेनवमी शुचौ तु दशमी शुक्ला तु पुष्ये सितेकादश्यू-
र्जे सितेत्वेजोमधूक्तपस्यात् पाठः शुक्लोर्जगं । शुक्लेपर्वतपस्यगोनभसिवादशौत्रमन्वा-
दयः । आस्त्रेमीकथिताः शुभाः पितृयज्ञौदानादिकेक्षमताः ति । अश्वसप्तमी । वसुरष्टमी

॥८४॥

शुक्लोज्येष्ठः । तपस्यूर्गः । फाल्गुनवर्तहिर्गः । नभसिवा इति योजना । मत्स्यपुराणे । अश्वयुक्शु-
क्लनवमी द्वादशी कार्तिकस्य तु । चैत्रस्य तु तृतीया या तथा भाद्रपदस्य च । फाल्गुनस्य चामावा-
स्या पुष्यस्यैकादशी तथा । श्रावणस्याष्टमी कृष्णा तथाषाढस्य पूर्णिमा । आषाढे शुक्लद-
शमी तथा माघस्य सप्तमी । कार्तिकी फाल्गुनी चैत्री ज्येष्ठी पंचदशी तथा । मन्वंतरादय-
स्त्वेता दत्तस्याक्षयकारकाः । पुराणांतरे आश्विनेत्यारभ्य श्रावणस्यामावास्येत्यंतं
तथा च नभस्ये चाष्टमी कृष्णेति । अथ कल्पादयः । स्यः पृक्षद्वयगाः क्रमात्प्रतिपदाद्याः
श्चैत्रमासक्रमात् । भूतौ माधवगौ मधौ तु मदनौ ज्येष्ठस्थिते पर्वणी । श्राद्धे त्रिंशदमी
शुभाः शुभनराकल्पादयः शुक्लगा इति । अमी त्रिंशत्कल्पादयः श्राद्धे शुभास्यः । शु

॥८४॥

136

कृष्णाः शुभतर इति योजना। नागरखंडे। अथ कल्यादयो राजन्निषादिरा कल्यादीनुक्ताः त्रिं-
शाद्दमी कल्यास्तिथयः। प्रारमेष्टिनः। आरंभतिथयस्तेषां शुक्लाः पुण्यतमाः स्मृताः। नास्
श्राद्धे कृते पुण्यमा कल्पस्थायि कल्पनदृति। वक्षीराधतपस्ययोरसितगश्चैत्रेचेत्किः
कृष्णगः। द्वितीयौ थोर्जसहस्त्तयोगतसिता मुन्यंकमाराः क्रमाल्लम्नान्यकथिता अमामुनि
वरैः कल्यादयः पुण्यदा इति। राधतपस्ययोः नैत्रा रवफाल्गुनेयोः। असितो ज्ञिः कृष्णत्ती
या। वैत्रेतु कृष्णगो हिः कृष्णपंचमी दर्शश्च अथ क्रमात् ऊर्जसहस्त्यो गत सिताः। का
र्त्तिकमार्गशीर्षमाघशुक्लामुन्यंकमाराः सप्तमीनवमी द्वादशीमन्ये सप्त कल्यादयो मुनि
वरैः पुण्यदाः कथिताः। मत्स्यपुराणे। वैशाखस्य तृतीया या कृष्णा या फाल्गुनस्य च। पंचमी
चैत्रमासस्य तथैवांत्या तिथिः परा। शुक्ला त्रयोदशी माघे कार्तिकस्य च सप्तमी। नवमी मार्ग
शीर्षस्य सप्तैतान्स्मराम्यहं। कल्पानामादयो ह्येता दत्तस्याक्षयकारका इति। अथ व्य
तीपातः। आद्याविंशतिरश्विया द्यप्ययकतानोऊस्तेतो विंशतिः सैकाश्रेष्ठनरापनादशत
तः सप्तव्यतीपातके। दानादाविति। व्यतीपातके प्रसिद्धव्यतीपाते दानादौ आपाउपयक्तानि विं
शतिद्विविंशतिनाडोऽशिष्याः। तेन त्वादनंतराः सैका विंशतिः श्रेष्ठतराः तत्सदनंतराः
श्रेष्ठतमाः। तत्सप्ततिश्रेष्ठतमादस्यर्थः। नृसिंहपुराणे। फलं लक्षगुणं सौभ्यमणेकौ
टिकं चार्तेण तत्रे शातकोद्यस्त्कृपतिते सप्तनोडिका इति। श्रवणाश्विधनिष्ठाहवस्तुभाश्लेषा
दिमांप्रोमृगे। वारे कस्य भवेदमा बहुफलः सोऽप्योव्यतीपातकः इति वृद्धमनुः। श्रवणा

137

श्रिय इति श्रीहरिनागदेवसमस्तके। पद्यमाविचारेण व्यतीपातः स उच्यते। मस्तके प्रथमच
रणे। एतच्च श्रवणादिभिः प्रत्येकं संबध्यते। केचित्तु मस्तकं मृगशिर इति। व्याचक्षते तन्दधि
प्रोक्तं मृगे शिरः। अथ प्रकीर्णकालः। तत्र स्यात् व्यतिपात वैधृति समाख्य क्रांतिसाम्यं श
वेश्चन्द्रस्येति। रवेश्चन्द्रस्य च क्रांतिसाम्यं यत् तद्व्यतिपातवैधृतिसमाख्यं। व्यतीपातो
वैधृतिरिति समाख्या नाम यस्य स तथा। तत्र शास्त्रं स्यात्। गुरुः। क्रांतिसाम्यसमयः
समीरितः सूर्यपर्वसदृशो मुनीश्वरैः। तत्र दत्तहुतजप्तपूजनं कोटिकोटिगुणमाह भा
र्गवः। अस्य लक्षणमुपरिष्टाद्वक्ष्यते। अथ तिथित्रयंस्पृक्त्रातिथ्योवारः सपुण्यो व
म इति। विष्णुः। तिथित्रयंस्पृशत्येको वारः स्याद्दिवमहितं न पुण्यः सोपि दिक्षयाख्य
समयस्तिथ्योः क्षये यो भवेद्वासरं न इति। यदा तिथ्योः क्षये तिथिद्वयावसाने वासराव
सानं स दिनक्षयः यत्र तिथित्रये पिवा राजुवृद्धिः सोवम इति। अथ तिथिस्त्रिवारस्पृग
सौ तिथ्यधिरष्यो दिवेति। तिथ्यर्द्धस्तिथिवृद्धिरिति यावत्। विष्णुः। त्रिवारस्पृक्ति
थिर्यत्र दिनं वृद्धं तदुच्यत इति। स्यपुण्य तिथियोगऋक्षकरणाद्यं तेषु कालो दिन
छिद्राख्य इति। तिथियोगनक्षत्रकरणाद्ये आद्यः अंताश्च तेषु यः कालः स दिनछिद्रा
ख्यः। तथा च गुरुः। तिथ्यर्द्ध तिथियोगर्क्षच्छेदीनामि पर्वणः। सदृशो दिनसंधिद्ध समाख्यो
माह भार्गव इति। तिथ्यर्द्धं करणं। छेदोंतः आद्यंत समय प्रमाणमाह सकृते स्तिथेर

॥६९५॥

॥६९५॥

वसितावादौ पक्षे स्थिते शतांश अष्टाभिश्च युतं घटीद्वयमुडौ श्चैवं पंचभिः संयुतं विंशत्याथ कथ
लाभिते युतमिदं योगस्य संक्रान्तिरिति । सकृतेः सकरणस्य तिथेः अवसिते अवसाने
आदौ च स्थिते शतांश अष्टाभिश्च फले युतं घटीद्वयं । उडौ नक्षत्रस्य चेदाद्यंत समये तदा निंशा
त्या पंचभिश्च फले युतं घटीद्वयमथ योगस्याद्यंत समयस्तदा कलाभिते । षोडशभिः पलै युतं
घटीद्वयं । अथ योगस्याद्यंत समयस्तदा कलाभिते । षोडशभिः फलै युतं । रवि घटीद्वयं पुण्यं
संक्रान्तिमित्यर्थः । अर्थाद्धि तत्पुण्यपदमावर्तं ज्ञेयं । अतः ॥ छेदादिकालाः कथितास्तिथिकृत्ये
घटीद्वयं । नागवह्निपलोपेतं तद्देन च फले युतं । पलैः षोडशभिर्युक्तं नाडिकाद्वितयं स्मृतः छे
दादिसमयः प्रोक्तो दानेनंतफलप्रद इति । गुर्वर्कादिषु वेधपाप्यबहुलाश्चेत् पुण्यकालः स्मृ
त इति । बहुलाः कृत्तिकाः । पद्मपुराणे । मंदे वार्के गुरौ वापि वारे षु तेषु तुत्रिषु त्रीण्येतानि
तु ऋक्षाणि स्वयं प्रोक्तानि ब्रह्मणा । अश्वमेधाधिकं पुण्यं स्नानात्तस्मिन् भवेन्नृपेति । त्रीणि
ऋक्षाणि आग्नेयमाप्यप्राजापत्यानीति निबंधकृद्भिर्व्याख्यातानीति । सोमर्क्षे स्थिते रवौ
जीव त्रिशिनां यस्मिन्स कालो ग्रिय इति । यस्मिन्काले यस्मिन्तिथौ सोमर्क्षे मृगे रवौ जीव त्रि
ना स्थिते तिः स कालो ग्रयः पुण्यरतियावत् । वामनपुराणे । यदा मृगशिरे ऋक्षे शशिसूर्यौ बृ
हस्पतिः ॥ तिष्ठंति सा तिथिः पुण्यरक्षया परिगीयते । राधास्थो रविरग्निभेति । कृत्तिकायां पद्
मकः पुष्करे दुर्लभ इति । शंखः । विशाखासु यदा भानुः कृत्तिकासु च चंद्रमाः । स योगः पद्मको
नाम पुष्करे ष्वति दुर्लभ इति । महती तथोपपदयुक्ता शस्ता तिथिर्वैधृतिरिति । महतीमहच्छब्दयुक्ता
तिथिः शस्ता । तथोपपदयुक्ता सोपपदा तिथिः शस्तेत्यर्थः । शिवरहस्ये । महच्छब्दप्रयुक्ता या याच

सोपपदातिथिः सामावास्या समाद्येया दानाध्ययकर्मसु तिथ्यवैधृतिश्च व्यतीपात इत्यादिग्रहे
प्रोक्तौः। अथ निमित्ततः सत्पुण्यकालः। नोकाले क्षणमाश्रयाभयजलान्नादेन्नदाने दिने द
तिः अथिनि आश्रयादिदाने नोकालेक्षणं पुण्यकालप्रतीक्षा नास्तीत्यर्थः। विष्णुधर्मोत्तरे
नकालनियमो दृष्टो दीयमाने प्रतीश्रये। तदैव दानमस्योक्तं यदा पात्रः समागतः। तथा
कालस्सर्वोपि निर्दिष्टः पात्रं सर्वमुदाहृतं। अभयस्य प्रदाने तु नात्र कार्यविचारणा॥ नहिका
लं प्रतीक्षेत जलं दातुं तृषान्विते। अन्नोदकं सदा देयमित्याह भगवान्मुनिः। तद्वत्सक
लप्रसूतस्सुरभीदान इति उभयतोमुखीदान इत्यर्थः। स्कान्दे। अर्धप्रसूतां गां दद्यात्का
लादिनविचारयेत्। कालः स एव ग्रहजं यदासौ द्विमुखी तु गौरिति। मुमूर्षुस्तु चेत्काले
वितरेद्धेन्वादि सस्तुतां गां वात्सहीनामुत इति। मुमूर्षुरासन्नमृत्युस्तत्काले मरणकाले स
स्तुतां सवत्सां उत अथवा। वाराहपुराणे। व्यतीपातोथ संक्रान्तिस्तथैव ग्रहणं रवेः। पुण्य
कालास्तदा सर्वे यदा मृत्युरुपस्थितः। तदा गोभूहिरण्यादि दत्तमक्षय्यतामियात्। व्यासः।
आसन्नमृत्युना देया गौः सवत्सा तु पूर्ववत्। तदभावे तु गौरेव नरकोद्धारणाय। अशक्तौ तेन
दरुग्विध्यायस्तु कृतं दद्यात् प्रमीताय तत्र इति। अशक्तौ तु मरणसमये दानाशक्तौ तु अकृते
अनासन्नमृत्युः पुत्रादिरिति यावन्नष्टं तद्गोदानादिकं विधानतस्तु कृतं प्रमीताय मृता
यदद्यात्। व्यासः। तयोर्द्वौ दिनत्राकोति दातुं वैतरणीं तु गां। अशक्तौ न्यो रुकूनदाद्वा दद्या
ल्ये यो मृतस्य तु। श्राद्धावितत जनिर्यदा ससमयोदाने प्रियश्चापुत्रो नित्यवादिति। जनि

१२०॥

१२०॥

निरुक्तिः। चकारो भिन्नक्रमः स द्युत्यनंतरं योज्यः। आयुषो नित्यत्वादिति तत्र हेतुः। मत्स्यपुरा
णे। पापानां जायते वित्तं वित्तं श्रद्धासमन्वितं। तदैव दानकालः स्यात्प्यतो नित्यं हि जीवितमिति।
अथ तिथिविशेषवर्ज्यानि। अथ नो विष्कंभितं फगे पत्रये द्वौ सिंदूगे इति। मार्कंडेयः। लि
हादित्येषु कृष्णपक्षे चतुर्थ्यां चंद्रदर्शनं। मिथ्याभिदूषितं कुर्यात् तस्मात्तत्र्ये न तं स द इति। स
प्तम्यां तिलतर्पणां जन कली स्तौल भुजिनाम्रकेनिंबपात्रेण नीलवस्त्रविधृता स्नानं च धात्री
फलैः। वर्जीस्यादिति। वर्जीस्यादिति। अविच्छगम्यादय इति जिनिः। तद्योगे अर्केनोभ विष्ण
दाधर्मणियोरिति षष्ठीनिषेधात् कलीनित्यादौ द्वितीयाद्येया। भविष्यत्पुराणे। सप्तम्यां न
स्पृशेत्तैलं नीलवस्त्रं न धारयेत्। नाचाप्यामलकैः स्नायान्नकुर्यात्कलहं नरः। तथा। निंब
स्य भक्षणं तैलं तिलैस्तर्पणमंजनं। सप्तम्यां नैव कुर्वीत ताम्रपात्रे च भोजनं। अथ पर्वानु
ष्ठेयं॥ ॥अथ भूतदर्शरविसंक्रांतिरष्टमी पूर्णिमा। पर्वाख्या इति। विष्णुपुराणे। चतुर्दश्य
ष्टमी चैव अमावास्याथ पूर्णिमा। पर्वाण्येतानि राजेंद्र रविसंक्रांतिरेव चेति। गदितो त्रत्रां तिवि
ध्ययेहोमस्तिलैरक्षतैर्गायत्र्यानियमेनेति। अत्र पर्वसु नियमेन होमो गदित इति पदयोज
नामनुः। सावित्रान् शांतिहोमं कुर्यात्पर्वसु नित्यश इति। सावित्रान् सवितृदेवताकान्। अत ए
व गायत्रीमंत्रो त्र। विष्णुः। पर्वसु च वत्रयं तिलहोमं कुर्यादिति। कर्त्तुः शरीरनियममाह। ऋषि
नवपुस्यादिति। विष्णुः। अलंकृतस्तिष्ठेदेवमाचारसेवास्यादिति। पंचदश्यो स्त्वधोगः प
श्चाच्छ्रावयीत नित्ययगलिताचारः श्रुतिगुह्णिमानिति। पंचदश्यो पूर्णिमामावास्ययोरग

लितावारः ब्रह्मचर्यवान् शुचिः पवित्रः गुप्तिमान् रक्षावान् । अग्नेः पश्चादग्न्याधानानं
रं तैमिति यावत् । अधोभूमौ शयीत । कात्यायनः । पौर्णमास्याममावास्यामधः स्वापो वि
धीयते । अनाहिताग्नेरयोवं पश्चादग्ने र्विधीयत इति । अनाहिताग्निरत्र स्मार्ताग्निमान् ।
आपस्तंबः । दिवा आदित्यः सत्त्वानि गोपायति नक्तं चंद्रमास्तस्मादमावास्यायां निशायां स
धीयसामात्मनो गुप्तिमिच्छेत् प्रायत्य ब्रह्मचर्यकालेन च जायायाः सह जां रात्रिं सूर्याचंद्रमसौ
वसत इति ॥ ॥ मासं स्याज्जपदे वा पित्र्ययजने योग्यः स दर्भः । अतो दर्भोयद् इति । यो दर्भो दर्शे
क्षितः स मासं जपादौ योग्यः स्यात् । मासमित्यंतसंयोगे द्वितीया । षड्विंशन्मते । मासेन स्या
दमावास्याद् दर्भो ग्राह्य इति । अथ सदा सकर्मसु शुभो दर्भो नभस्याहृत इति । योन भसि । आ
हृतः स सदा कर्मसु शुभः तथा चाक्तं । मासे नभस्यमावास्या तस्यां दर्भोच्चयः स्मृतः । अयातयाम
मास्ते दर्भा विनियोज्याः पुनः पुनरिति । अथ पूर्ववर्ज्यानि । उशनस् वस्तुदंतकाष्ठपिशितक्षौ
राणि विरुच्छिदां स्त्री तैलाध्ययनानीति । उत्सृजेद्वा पिशितं मांसं । वीरुच्छिदां वल्लीछेदं ।
मनु चतुर्दश्यष्टमीदर्शपौर्णमास्यर्कसंक्रमे । एषु स्त्री तैल मांसानि दंतकाष्ठानि वर्जये
त् । हारीतः तैलं मांसं भगं क्षौरं पर्वकालेषु वर्जयेत् । बौधायनः । पर्वसु नाधीयीतेति । विष्णुः
पर्वसु न रमपि स्त्रियादिति । अमासु तु शिलापिष्टं परान्नं त्यजेत् । स्त्रियान्नैव स मिर्कुं
ग्राह्यः ... दिकार्यं विनानो धार्यं वसनं न यनं तु पुनर्भुंजीत रात्रौ न चेति स्मृतिसमा
सारः । सामंताद्या परान्नं तु पुनर्भोजनमैथुने तैलं मांसं शिलापिष्टममावास्यां विवर्जयेत्

॥२॥५

रा.

॥२॥५

॥१२॥

रुच्छेदं स तैलं भजेदिति स्पष्टं। नंदाजन्मदिनाध्वरेषु नियमे श्राद्धे च पालेसजे तैलस्याभि
षदन्तधावनविधी न्यन्यौ तथा शोषिन दृति। नंदा तिथिः। अध्वरो यागः। नियमो व्रतं। आभि
ष। मांसं। तथा व्यासः। षष्ठ्यष्टमीअमावास्यापक्षद्वयचतुर्दशी। अत्र संनिहितं पा
पं तैले मांसे क्षुरे भगे। संक्रांत्यां पंचदश्यां च द्वादश्यां श्राद्धवासरे। वस्त्रनिष्पीड्यते नै
व क्षुरेणापि न हिंस्यते। व्यासः। तैलं न संस्पृशेदामवृक्षादीन्छेदयेन्न च। पक्षादौ च र
वौ षष्ठ्यां रिक्तायां च हरे स्त्रियौ॥ वामनपुराणे। नंदासु नाभ्यंगमुपाचरेव क्षौरं च रिक्ता
सु जयासु मांसं। पूर्णासु योषित्परिवर्जनीया भद्रासु सर्वाणि समारभेत। नाभ्यंगमर्के न
च भूमिपुत्रे क्षौरं च शुक्रे च कुजे च मांसं। बुधे च योषां न समाचरेत शेषेषु सर्वाणि सदैव
कुर्यात्। चित्रासु हस्ते श्रवणे च तैलं क्षौरं विशाखा प्रतिपत्सु वर्ज्यं। मूले मृगे भाद्रपदासु
मांसं योषिन्मघाकृत्तिषु सो नरासु। व्यासः। श्राद्धे यज्ञे च नियमे पत्न्यौ च प्रोषिते तथा।
व्यतीपाते च संक्रांत्यां नंदाभूताष्टपर्वसु। तैलाभ्यंगरतिमांसं दंतकाष्ठं च वर्जयेत्। तथा अ
ष्टम्यां च चतुर्दश्यां पंचदश्यां च जन्मनि। तैलं मांसं व्यवायं च दंतकाष्ठं च वर्जयेदिति। षष्ठ्या
दावपि वर्जिते पलमुखे मांसाशने पंचदश्यंगे च चतुर्दशीति कथितं दोषाधिकं वा यतः
दिति। षष्ठ्यादौ पलमुखे मांसादौ वर्जितेपि मांसाशने पंचदश्यादिषु यो दोषाधि
क्यमेत्यर्थः। तथा च मनुः। मांसाशने पंचदशी तैलाभ्यंगे चतुर्दशी। अष्टमी ग्राम्यध
र्मेषु ज्वलंतमपि पातयेदिति। विज्ञेयं पित्रादिवर्जनविधौ तिथ्यादि तत्कालगमिति
आदित्योदये नक्षत्रं तत्कालगं ज्ञेयं। यावत्कालं वर्तते तावद्वर्ज्यमित्यर्थः॥

॥१२॥

143

सूर्यग्रक्षगते सोमे परान्नं यो हि भक्षयेत्। तस्य मासगतं पुण्यं यस्यान्नं तस्य तद्भवेत्। मार्कंडेयः॥
अमावास्यासु सर्वासु नवं वस्त्रं न धारयेत्। तथाच। अमावास्यां न सेवेत रात्रौ भोजनमैथुने।
पीठीनसिः। अमावास्यां हरितं छिद्यात्। व्यासः। अमावास्यां न तु छिद्यात् कुशीश्च समिधस्त
था। सर्वत्रावस्थितः सोमो हिंसायां ब्रह्महा भवेत्। पित्रादिकार्यार्थं कुशाग्रहणे एव। कुत्राः शाकं
च पुष्पाणि। वागर्थे चतृणादिकं। आहरेद्दैवपित्रर्थं अमावास्यां द्विजः। तथैव पूर्वमुक्तवा
दिति। अथ कालविशेषवर्ज्यानि। अष्टम्यादिषु। नारिकेलकमलाबुरवं पटोलं क्रमान्निष्पा
वांश्च मसूरिकाः परिहरेद्भूताक्रमं भोजने इति। तथा च स्कंदपुराणे। शिरःकपालमंत्राजिन
स्त्रव च मतिलांस्तथा। एतानि क्रमशो नित्यं अष्टम्यादिषु वर्जयेदिति। वृक्षच्छेदनमांसतैलसु
रतक्षौराणि षष्ठ्यां त्यजेत्। श्राद्धे हेमगृहाध्यायो हरितिथौ क्षौरक्रियां वर्जयेदिति। राध्या
विशाखा। पूजाग्नेयम चोत्तरात्रप बुधेषु ञ्जेद्वतमिति। पूर्णातिथिः आग्नेयं कृत्तिका छु
धो वारः संक्रमेष्वाद्धो हे बरपीडनं हरितिथौ पक्षावसाने त्यजेदिति। अंबरपीडनं स्ना
नानंतरं वस्त्रपीडनं क्षौरादिना वस्त्रक्षालनं च। पक्षावसानं पंचदशी। नंदावा कृकरा
जभेषु न भजेत्तैलमिति। नंदातिथिः वो ष्टुं चित्राकरोहस्तः अजभं श्रवणः। विष्णोभे
जयामूलप्रोष्ठपदासु नैव पिशितं सेवेतेति। विधे भौमिगृगेः जयातिथिः प्रोष्ठपदा भाद्र
पदा। रिक्तासु तु पक्षान्त्यां क्षुरकर्म तैलं हरितच्छेदं त्यजेदिति। रिक्तातिथिः पक्षांतिः
प्रतिपत्। हरितं स्नाइतृणादि। भूमिजे वाभ्यंगं पित्रिान मिति। भूमिजो मंगलः। रवौ तु न

कालनिर्णयकाराः। अत्र यावल्लक्ष्म्यादितिथिस्नानकालं तैलादिनिषेधः ननु षष्ठ्यादि संध्याहो
रात्रे प्रमाणाभावादि गोमूत्रं नु निशामुखे निशि लुप्तौ यं तथा गोमयं नैव ग्राह्यमदृष्टकर्म
स्विति। निशामुखं प्रदोषः। तथा च यमः। न स्त्रानोदकं वापि न निशायां च गोमयं। न गोमू
त्रं प्रदोषे शुचिर्गृह्णीयाद्बुद्धिमान्नर इति। अर्थवादादृष्टकर्मार्थत्वे न निशायां ग्रहणनिषेध इति
कालनिर्णयकाराः॥ महागुर्वन्नपाते चाचरेन्नाद्याद्वेध्ययनं च तर्पणं महादानाभिषेक
क्रियामिति। तथा च स्कांदे॥ स्नानं चैव महादानं स्वाध्यायं पितृतर्पणं प्रथमेब्दे न कुर्वी
त महागुरुनिपात इति। नोद्वाहः शुभदो गुरौ हरिगते इति। हरिः सिंहः। तथा च माण्डव्य
श्रुतिर्यैव्यजीतक्रान्त प्राशन मुखं चान्यदिति। सुप्ते तु विष्णौ वरेन्नोद्वाहः व्रतबंधचौ
लमुखसंस्कार प्रतिष्ठामखान् पुण्यं कर्म गृहप्रवेशान मुखं चान्यदिति। तथा च भवि
ष्योत्तरे। सुप्ते विष्णौ निवर्तंते क्रियाः सर्वाः शुभादिकाः। विवाहव्रतबंधादि चूडासंस्का
रदीक्षणं। यतो गृहप्रवेशाश्च प्रतिष्ठादेवभूभुजां। पुण्यानि यानि कर्माणि न स्युः सुप्ते ज
गत्पताविति। अथ क्षौरनिषिद्धकालः॥ नन्दार्कं शुभं क्षौरं स्नानमथिया सुभूषितरणास्था
नासनाभ्यंगिनां। तद्वदुक्तं सुप्तयोश्च न चरेत्क्षौरं निशासंध्ययोर्विष्ट्यादिन्यकुजा
र्कजे शुनवमीतिथ्यां च धीमानिति। अनासनः। आसनरहितः। विधिर्नेष्टा। तद्व तथा
स्नातादीनां भुक्तसुप्तयोश्च न चरेत्क्षौरं शुभं नोक्तं तथा निशादौ च क्षौरं नाचरेद्दिव्य
र्थः। तथा च ज्योतिःशास्त्रे॥ नाभ्यक्तभुक्तरणकालनिशासनानां न स्नानसुप्तगमनोत्सु

155

कृच्छ्रूषितानां । संध्यानिशार्ककुजं सौरिदिने नृराणां क्षौरं हितं भव विचार्क्किन चापि वि
ष्ट्यामिति । मार्कंडेयः । अष्टमी च तथा षष्ठी नवकं च चतुर्दशी । क्षुरकर्मणि वर्ज्याः स्युः पर्वसं
धिस्तथैव चेति । कालविशेषवर्जनप्रकरणे नवमी नोक्तेत्युक्तेति भावः । अथ श्म
श्रुनिषिद्धकालः । अथ । तिथ्युक्तमनिशासनाश्रितवतां सापेचयक्षेद्य तस्मात ग्रामधि
यास्तु नष्टमनस्कां श्मश्रुक्रियान स्मृतेति । नष्टमनागेषु पक्षेः । तथा च मरीचिः । निरा
सनस्य स्तु मस्य तिष्ठतश्च तथैव च । सायंकृतं वतश्चैव स्नातस्य सविनस्य च । यात्राप्र
द्योद्यतस्यापि श्मश्रुकर्म विवर्जयेदिति । अथ मांसवर्जनकालः । प्रागुक्ते समये तथा
हरितिथौ मांसं चतुर्थ्यां त्यजेत्स्वर्गार्थी तु सदा निशासु पदिनो शक्तिः प्रसुप्ते हरौ । मांसं
वाश्वयुजं दिनत्रयमुत स्यान्मांसवर्ज्यं इति । स्वर्गार्थी प्रागुक्ते समये काले विशेषव
र्ज्यप्रकरणोक्तकाले तथा हरितिथौ द्वादश्यां चतुर्थ्यां निशासु तु सदा रात्रिमात्रे मां
सं त्यजेत् । यदि नोशक्तिस्तावद्वर्जने शक्तिर्नास्ति तदा प्रसुप्ते हरौ वार्षिकमासेषु उता
थवा आश्वयुजमासं च कारा कार्त्तिके दिनत्रयं वा मांसवर्जः स्यादिति योजना । अत्युं
तसंयोगे द्वितीया । तथा च नंदिपुराणे । यदिनामनशावर्षं सदा मांसं विवर्जयेत् । वर्ज
येदयने तु रव्ये कृतस्वर्गमतिर्नरः । चतुर्थी चाष्टमी चैव द्वादशी च चतुर्दशी । संक्र
मे चापि सूर्यस्य विषुवे चापि वार्षिके । मांसात्तु विरतो मर्त्यः स्वर्गं याति दिनत्रयं । अ
थवाश्वयुजं मांसं वर्जयेन्मांसभक्षणं । तथा ॥ यो नरः कार्त्तिके मासे मांसं तु परिव

५५३१

र्जयेत्। संवत्सरस्य लभते पुण्यं मांसविवर्जनादिति। अथ शयनविहितनिषिद्धकालः। नि
शामध्यस्थप्रहरद्वयं तु विहितं स्वापे यथा मौनं येत् आम्नायाभ्यसनेन पूर्वचरमौ या
त्रेरिति॥ अथ रात्रेः पूर्वचरमौ यामौ आम्नायाभ्यसनेन वेदाध्ययनेन नयेदिति क्रमेण तु
निशामध्यस्थप्रहरद्वयं तु स्वापे निद्राविषये विहितं। तथा च दक्षः। प्रदोषपश्चिमौ या
मौ वेदाभ्यासेन तौ नयेत्। यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पत इति। तयोस्तु
न द्विजो न स्वप्यान्न दिवा न भस्मनि नरेछिष्टस्तथा संध्ययोरिति। तयोः रात्रेः प्रथमच
तुर्थयामयोः। तथा च व्यासः॥ न दिवा प्रस्वपेत् जातु न पूर्वापररात्रयोरिति। तथा वाभि
राः। नोच्छिष्टो न दिवा स्वप्यात्संध्ययोर्न च भस्मनि इति। ब्रह्माधीत्य च नो निशांत समये स्व
याद्दिति। ब्रह्मवेदः। तथा च मनुः॥ न निशांते परिश्रांतो ब्रह्माधीत्य पुनः स्वपेदिति। परिश्रां
तो पि न स्वपेदित्यर्थः। अथो जायया मिथुनीभूयत यासमनं तु पुमान् रात्रिं त्रायीता खिलाद्धि
ति। मिश्रीभूय। मिथुनीभूय। आपस्तंबः॥ मिथुनीभूय न सर्वां रात्रिं शयीतेति। अथ दं
तधावननिषिद्धकालः। आशौचे के दिने तथा दिमतिथौ षष्ठ्यां नवम्योः स्यपर्वे काष्ठैर्दंति
मृजां व्रतोपवसनो श्राद्धेषु रोगेषु च। मध्याह्न्कोपलवने इति। दंतमृजां दंतधावनं। आह्नव
नं स्नानं। तथा च संवर्तः। अपेतिथौ नवम्यां च क्षये चंद्रमसस्तथा। आदित्यवारे आश्वौ
चे वर्जयेद्दंतधावनमिति। तथा कात्यायनः। प्रतिपद्दर्शषष्ठ्यां तु नवम्यां तु विशेषतः
दंतानां काष्ठसंयोगे दहत्यासप्तमं कुलमिति। व्यासः। आद्वेजन्मपदिने चैव विवाहे॥

ना.

मुखदूषिते। व्रते चैवोपवासे च वर्जयेद्दन्तधावनमिति। तथा। यो मोहात्स्नानसमये भ
क्षयेद्दन्तधावनं निराशास्तस्य गच्छन्ति देवताः पितृभिः सह इति। अथ यन्निषेधो मध्याह्नस्ना
नविषयः। प्रातःस्नाने विधानात्। मुखार्थं प्रातरुत्थाय भक्षयेद्दन्तधावनमिति। अत्रा
पि कालविशेषवर्ज्यप्रकरणोक्तो विशेषो ज्ञेयः। अथ निंद्यसमये ऽलाभे ऽथवा कोष्ठिते
गंडूषैर्द्वादशभिर्जलैः सरसनोल्लेखं दलैर्वाचरेदिति। अथ निंद्यसमये। अथवा काष्ठा
नामलाभे अर्कोल्मितैर्गंडूषैः द्वादशभिर्गंडूषैः दलैः पत्रैर्वा सरसनोल्लेखं जिह्वोल्ले
खसहितं दन्तमृजामाचरेत्। तथा च व्यासः। अलाभे दन्तकाष्ठानां निषिद्धायां तथा तिथौ।
अपां द्वादशगंडूषैः पत्रैर्वा शोधयेन्मुखं। तथा। प्रतिपद्दर्शषष्ठीषु नवम्यां दन्तधावनं। पत्रैर
न्यत्र काष्ठैस्तु जिह्वोल्लेखं तथैव हीति। दन्तधावनविधिमाह। धौ वायुर्बलमित्यनेन मनुना
संमंत्र्य तेनाचरेत्काष्ठेनोपविश्य दन्तधावनमदः प्रक्षाल्य जह्यात्तेन इति। उपविः उषःकाले आ
दौ दन्तकाष्ठं शुचौ वा प्रक्षाल्य आयुर्बलमित्यनेन मनुना मंत्रेण संमंत्र्य तेन काष्ठेन दन्तधावन
माचरेत्। ततः दन्तधावनानन्तरं पुनः प्रक्षाल्य जह्यात्। तथा च कात्यायनः। उत्थाय नेत्रे प्र
क्षाल्य शुचिर्भूत्वा समाहितः। परिजप्य च मंत्रेण भक्षयेद्दन्तधावनं। आह्नेयज्ञेच नियमा
न्योद्याप्रोषितभर्तृका। तथा मंत्रः। आयुर्बलं यशो वर्चः प्रजापशुवसूनि च। ब्रह्मप्रज्ञां च मे
धां च त्वं नो धेहि वनस्पते इति। पाराशरः। प्रक्षाल्य भक्षयेत्पूर्वं प्रक्षाल्यैव तु तत्त्यजेदिति।
अथ संध्याकालः। प्रातःसंध्योपासनास्तु मत्स्तोकांता प्रत्यगुरुविधिः। अनौचभयतो मे शुचिता

१३४॥

१३४॥

(158)

रमानसीस्मृता॥ सोच्चाराद्येति॥ प्राक्संध्योपासना सूर्यालोकात्ता· सूर्यदर्शनांतास्मृता॥ प्रत्यक्पश्चि
मा संध्योपासना उडुविनक्षत्रदर्शनांतेत्यर्थः॥ तारः प्रणवः॥ सोच्चारा यस्या सोच्चारः अर्घ्यो यस्यां सा सोच्चा
रार्घ्या॥ तथा च याज्ञवल्क्यः॥ जपन्नासीत सावित्रीं प्रत्यगातारकोदयात्॥ संध्यां प्राक् प्रातरेवं हि ति
ष्ठेदासूर्यदर्शनादिति॥ तथा च विष्णुपुराणे॥ सर्वकालमुपस्थानं संध्ययोः पार्थिवेष्यते॥ अन्य
त्र सूतकादौ च विभ्रमातुरभीतितः इति निषेधे प्राप्ते। सूतके मृतके चैव संध्याकर्म न संत्यजेत्॥
मनसोच्चारयेन्मंत्रान् प्राणायाममृते द्विज इति वचनात्सूतकादौ मानसी संध्या कार्येत्याशयेनोक्तं॥
आशौचे इत्यादिना। सूतके तु सावित्र्या अंजलिप्रक्षिप्य प्रदक्षिणां कृत्वा सूर्यं ध्यायन्नमस्कु
त्यो॰८ र्वीतेति पैठीनसिवचनमपि प्रोक्तं सोच्चाराद्येति। अर्घ्यांजलिप्रक्षेपः उच्चारो मंत्रः। आशौचादि
ष्वपि सकृत् अंजलिप्रक्षेपणं सोच्चारं समंत्रकं अन्यत्सर्वं मानसमित्यर्थः॥ अथ संध्यावर्ज्यानि॥
अथ मृत्वादि दानाहारप्रतिग्रहाद्या निद्रा या स्नान पाठौ संध्याकाले विवर्जयेत्। तथा लोके संध्या
यां न स्वपेच्चैव न च विद्यां समभ्यसेत्॥ न भुंजीत न च स्नायात्स्त्रीणां चादिन च क्षिपेत्। दानं
प्रतिग्रहं चैव स्वाध्यायं परिवर्जयेत्॥ दाता वैतरकं याति गृहीता योनिमज्जति॥ अथ
रात्रिकरणीयवर्ज्यानि॥ रात्रौ स्नानादिकं नैव कुर्यान्नैमित्तिकं विनेति॥ तथा च भविष्य
पुराणे॥ रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः॥ नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रि
थ षु इति॥ अथ चतुष्पसेवा॥ संध्यानिशीथमध्याह्ने न सेवेत चतुष्पथमिति॥ मनुः॥ म
ध्यंदिनेऽर्धरात्रे च श्राद्धं भुक्त्वा न सामिषं। संध्ययोरुभयोश्चैव न सेवेत चतुष्पथमिति॥
अथ कालविशेषावलोकनीयानवलोकनीयानि॥ प्रातः पश्येच्छ्रियं गामग्निं चंदनहे

149

मनी ॥ मणिदर्पणं गुर्वादित्यमृदंगे नाकुपार्थिवान् यज्ञान्नदाग्निचितिसिंहदर्दृधार्मिकसागरा
न् ॥ कपिलां सत्रिणं भित्ति दृनः सूर्यं अंकुरं उदकं ॥ तथा कात्यायनः ॥ श्रोत्रियं सुभगं गां च अ
ग्निम् अग्निचितं तथा ॥ प्रातरुत्थाय यः पश्येदापद्भ्यः स विमुच्यते तेन तथा ॥ रोचनां चंदनं हेम मृदंगं
दर्पणं मणिं ॥ गुरुमग्निं च सूर्यं च प्रातः पश्येत्सदा हितः ॥ लोकेऽस्मिन्मंगलान्यष्टौ ब्राह्मणो गौर्हु
ताशनः ॥ हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥ एतानि सततं पश्येन्नमस्येच्च समाहितः
मङ्गमिष्टान्नदं सत्रि वा तासु धार्मिकान्नुरुन्नं ज्ञानसिद्धं स्नपः सिद्धान्नदं ष्टापापान्मृत्युच्यते
अग्निचित्कपिला सत्री राजा भिक्षुर्महोदधिः दृष्टमात्राः पुनंत्येते तस्मात्पश्येत नित्यश इति ॥
अथ नद्रजुभगपाधिनः ५ म त्रनालीदिहीनादीन्नापानुपश्येदिति ॥ तथा च स्वल्पापाधि छंदृर्भ
गं मत्तं नन्नमुक्तं सेनासिकं ॥ प्रातरुत्थाय यः पश्येत्तत्कलेरूपलक्षणमिति ॥ अथ नद्योरज
स्वलाः ॥ अथ निम्नगाः कर्कसिंहगते सूर्ये सिंधुगान्या रजस्वलेति ॥ सिंधुः ॥ समुद्रः ॥ तथा
सिंहकर्कटयोर्मध्ये सर्वानद्यो रजस्वलाः ॥ न स्नानादीति कर्माणि तासु कु
र्वीत मानवः ॥ कात्यायनः ॥ मासद्वयं श्रावणादौ सर्वा नद्यो रजस्वलाः ॥ तासु स्नानं
न कुर्वीत वर्जयित्वा समुद्रगा इति ॥ ग्रीष्मस्थ श्रापगानां स्यात् भूमौ नूतनोदकस्य च
दश रात्रं त्रिरात्रं त्रिरात्रिभ्यां शुद्धिरिति ॥ ग्रीष्मस्थ नदीनां दशरात्रं त्रिरात्रिभ्यां शुद्धिः
स्यात् ॥ तथा च कात्यायनः ॥ याः श्रोतमनुपगच्छंति ग्रीष्मे कुसरितो भुवि ॥ तासु प्रावृषि न स्नायाद
शोदिरात्रासर इति ॥ तथा च योगियाज्ञवल्क्यः ॥ प्रथमं कर्कटे देवी त्र्यहं गंगा रजस्वला ॥

॥१५॥

(150)

सर्वा रक्ताः महानद्यः करतोयांबुवाहिनीति ॥ भूमौ न्यूनोदकस्य चेति चकारेण दशरात्रमे
व समभिव्रीयते न त्रिरात्रं ॥ तथा च स्मृत्यंतरे ॥ अजागावो महिष्यश्च ब्राह्मण्यश्च प्रसूतिकाः
दशरात्रेण शुध्यंति भूमिस्थं च नवोदकमिति ॥ कर्के बृहस्त्रये । गंगा रेवा चंद्रभागा गोम
ती शरयूः तथा ॥ गंगा जाह्नवी ॥ तथा रजस्वलेत्यर्थः ॥ तथा याज्ञवल्क्यः ॥ प्रथमं कर्कटे देवी
त्र्यहं गंगा रजस्वला ॥ सर्वा रक्ता महानद्यः करतोयांबुवाहिनी ॥ करतोया रेवा ॥ कात्यायनः ॥
कर्कटादौ रजोदुष्टा गोमती वासरत्रयं ॥ चंद्रभागा सती सिंधुः शरयूर्नर्मदा तथेति ॥ उपा
कर्म ग्रहोत्सर्गप्रेतस्नानेष्वदुष्टतेति ॥ ग्रहश्चंद्रसूर्योपरागः ॥ अदुष्टता रजोदोषाभावः ॥ तथा
चोक्तं ॥ उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च ॥ चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यत इति
प्रसंगादन्यदाह कूपस्थामपि सोमार्कग्रहे गंगासमं जलमिति । तथा कात्यायनः ॥ स्वधु
न्यंभः समानि स्युः सर्वाण्यंभांसि भूतले कूपस्थान्यपि सोमार्कग्रहणे नात्र संशय इति ॥ स्वर्
धुनी गंगा ॥ अथ सागराश्वत्थस्य स्नानकालः ॥ अश्वत्थसागरौ सेव्यौ मंदे पर्वणीति ॥ तथा चो
क्तं ॥ अश्वत्थसागरौ सेव्यौ न स्प्रष्टव्यौ कदाचन ॥ अश्वत्थं मंदवारे तु सागरं पर्वणि स्पृशे
दिति ॥ अथ स्नानकालः ॥ अथाप्लुतिः ॥ प्रातर्मध्याह्नयोर्वापि वानप्रस्थगृहस्थयोः ॥
तपस्विनां त्रिसंध्यासु सकृत्तु ब्रह्मचारिण इति ॥ आप्लुतिः स्नानं ॥ तपस्विनो य
तयः ॥ तथा च दक्षः ॥ प्रातर्मध्याह्नयोर्वापि वानप्रस्थगृहस्थयोः ॥ यतेस्त्रिषवणं
प्रोक्तं सकृत्तु ब्रह्मचारिण इति ॥ दशम्यामधमः स्नाने सर्वं हंति त्रयोदशी ॥ कण्वः

नवमी द्वादशी चैव तृतीया च त्रयोदशी। प्रतिपत्तु विशेषेण स्नाने तासु विवर्जयेत्॥ व्यासः॥
द्वादश्यां कृष्णपक्षे तु न स्नातव्यं कथंचन॥ शुभसंतानमिच्छद्भिरपवर्गपरैरपि॥ यमः॥ द
र्शे स्नानं न कुर्वीत मातापित्रोश्च जीवतोः। पुत्रः कुर्वन्निराचष्टे मातापित्रोश्च जीवितं
गगजोवाली॥ त्रयोदश्यां तृतीयायां दशम्यां चैव सर्वशः॥ शूद्रविट्क्षत्रियाः स्नानं नाच
रेयुः कदाचन॥ मनुः॥ न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि॥ न वासोभिः सहाजस्रं
नाविज्ञाते जलाशये इत्यादिनिषेधस्य व्यवस्थामाह॥ दशम्यादौ निषेधोयं नित्यनैमित्ति
केविना। भुक्त्वा निशि सरोगस्य सवस्त्रस्य जलाशये॥ अज्ञाते प्रतिषेधोयं यदृच्छास्नानहेतुक=

॥७६॥

इत्यर्थः॥ तथा च स्मृत्यंतरे॥ भोगार्थं क्रियते यत्तु स्नानं यादृच्छिकं नरैः॥ तन्निषिद्धं दशम्यादौ
नित्यं नैमित्तिकं न हि ति॥ तथा च कालनिर्णयकारैः न स्नानमाचरेद्भुक्त्वेति वाक्यमुक्त्वा व्या
कृतं॥ भुक्त्वेति न नित्यस्नानः प्रतिनिषेधः भोजनानंतरं प्राप्त्यभावान्नापि चांडालस्पर्शनिमि
त्तस्य॥ नाशुचिः क्षणमपि तिष्ठेदिति वचनविरोधात् तस्माद्यादृच्छिकोयं निषेधः॥ आतुर
स्य तु अजस्रमनवरतं स्नाननिषेध इति॥ न स्नायादुत्सवेतीते मांगल्यं विनिवर्त्य च॥ अनु
व्रज्य सुहृद्बंधून् अर्चयित्वेष्टदेवतां॥ स्पष्टं॥ अथोष्णोदकस्नानकालः॥ नित्यमुष्णोदकैः स्ना
नं काम्यनैमित्तिकादवरति॥ तथा च षड्विंशन्मते॥ आपः स्वभावतो मेध्याः किं पुनर्वह्नि
संकृता॥ तेन संतः प्रशंसंति स्नानमुष्णेन वारिणा॥ वृथा तूष्णोदकस्नानं वृथा जाप्यम
वैदिकम् इत्यादिनिषेधस्तु नैमित्तिकाम्य—

निषयः। तथा च गर्गः॥ कुर्यान्नैमित्तिकं स्नानं त्रीताद्भिः काम्यमेव च॥ नित्यं याहृच्छिकं चैव य
थारुचि समाचरेदिति॥ अथामलकस्नानकालः॥ सप्तमीनवमीषष्ठीभूतामासं क्रमग्र
हान्ने। भानुवारं विना स्नायादामलैर्द्विविचक्षणः। आमलैः॥ आमलकैः॥ तथा व्यासः॥ श्री
कामः सर्वदा स्नानं कुर्यादामलकैर्नरः॥ सप्तमीनवमीं चैव पर्वकालं विवर्जयेत्॥ वृद्ध
शातातपे॥ सप्तम्यां च नवम्यां च संक्रांतौ रविवासरे॥ चंद्रसूर्योपरागे च स्नानमामलकै
स्त्यजेत्॥ क्रतुः॥ षष्ठी च सप्तमी चैव नवमी च त्रयोदशी। संक्रांतौ रविवारे च स्नानमाम
लकैस्त्यजेदिति॥ कृत्यगेपार्थमेकादश्यां रवावपीति॥ वृद्धशातातपे॥ तुष्यत्यामलकैर्वि
ष्णुरेकादश्यां विशेषत इति॥ यदेकादश्यां रविवारस्तदापि स्नायादेव॥ निषेधस्य
रागप्राप्तस्नानविषयत्वोदित्यो त्रायेनोक्त रवावपीति। अथ तिलस्नानकालः॥ ति
लस्नानं विना सूतिं ग्रहामा भानुसंक्रमास्त्विति॥ सूतिर्जन्मदिनं॥ तथा वृद्धशातातपे
तथा सप्तम्यमावास्या संक्रांतिग्रहसूतिषु॥ धनपुत्रकलत्रार्थी तिलपिष्टं न संस्पृशे
दिति॥ अथ निषेधो नोन्नरायणे॥ तथा च त्रिवरहस्ये॥ पुरा मकरसंक्रांतौ त्र्यंकरोग
स्तवे कृते॥ तिलान्नुसादयामास तत्प्रत्ये सर्वदेहिनां। तस्मात्तस्यां तिलैः स्नानं कार्यं चोदचनिं बुधै
रित्यादिस्नानविधानात्॥ अथाभ्यंगकालः॥ मंदे सोमे बुधेऽभ्यंगो भूतपक्षाष्टमीं विना॥ नवमीमि
ति॥ तथा च ज्योतिःपाराशरः॥ संतापः कांतिरल्पायुः धनं निर्धनता तथा॥ अनारोग्यं सर्वकामा अभ्यं
गाभास्करादिषु इति॥ बौधायनः॥ अष्टम्यां च चतुर्दश्यां नवम्यां च विशेषतः॥ शिरोभ्यंगं वर्जयेत्तु प

वस्त्रपि तथैव चेति ॥ अथ तैलाभ्यंगः ॥ अथ पानादि विनायकस्कंदे द्वितीयया ॥ सद्वारेऽभ्यजने तैलमपि ति
पातो व्यतीपातः ॥ आदित्यवारो वैधृतिसंक्रांत्यादीनां ग्रहणं द्वितीययाकृत्कौ सद्वारे अभ्यंगे अभ्यंजने तै
लं ग्राह्यं पक्षादौ चरयोष इत्यादिनान्यतिथौ नांतिनिषेधो ह्येषः ॥ तैलं चात्र तिलोद्भवमेव न कुसु
माद्युक्तं तस्य विकार इति पाणिनिस्मरणात् ॥ अभ्यद्रव्यकृतं च तदिति ॥ द्वितीयान्यतिथौ गौणं
मिति ॥ तद्दोषं ॥ तथा च प्रचेताः ॥ सार्षपं गंधतैलं च पुष्पैर्वासितं अन्यद्रव्ययुतं तैलं न दुष्य
ति कदाचन ॥ अथ तिलतर्पणकालः ॥ अथ जन्मदिने निषिद्धा ॥ गृहसंध्याभानुवारे न भौमे तिलतर्पणं
मिति ॥ क्वचित्तु गृह्यपाठः ॥ पक्षयोरुभयो राजन्स मध्योर्निशि संध्ययोः ॥ विद्यापुत्रकलत्रार्थी तै
लान्यं च सुवर्जयेदिति ॥ अथ मैथुनकालः ॥ आपं निदिष्टया याया त्यक्त्वा रात्रिचतुष्टयं ॥ प्रथ
मनेत्रं तं पौर्णमासी संध्यादिवानिशं ॥ श्राद्धाहादिमतिथ्यो श्च पर्वपातग्रहादिवान् ॥ दशम्यादि
त्रयं जन्मदिन रात्रिं त्रयोदशी ॥ एकादशी श्राद्धभुक्तदानं दत्वा भवेद्यमीति ॥ प्रथमं रात्रिचतुष्टयं
ऋतुदिनमारभ्येत्यर्थः ॥ दिवानिशं ॥ श्राद्धाहादिमतिथ्यो निशं ॥ श्राद्धतिथिनिशं ॥ श्राद्धाहादिम
